# Shri Vighnavinashaka Stotram

# શ્રીવિઘ્નવિનાશકસ્તોત્રમ્

## Document Information

Text title : Shri Vighnavinashaka Stotram

File name : vighnavinAshakastotram.itx

Category : ganesha, shrIdharasvAmI

Location : doc_ganesha

Author : Shridharaswami

Transliterated by : Sonali Upendra Dasare, Sumit

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીવિઘ્નવિનાશકસ્તોત્રમ્

ઈશાનો ઢુણ્ઢિરાજો ગણપતિરખિલાઘૌઘનાશો વરેણ્યો
દેવાનામગ્રગણ્યઃ સકલગુણનિધિર્યોઽગ્રપૂજાધિકારી ।
વિઘ્નાધીશો બલિષ્ઠઃ ષડરિવિદલનઃ સિદ્ધિબુદ્ધિપ્રદાતા
જીવાનાં મુક્તિહેતુર્જયતિ ભવહરઃ શ્રીગુરુઃ સૌખ્યસિન્ધુઃ ॥ ૧॥

વિઘ્નાન્હન્તીતિ યોઽસૌ શ્રુતિષુ નિગદિતો વિઘ્નહેતિપ્રસિદ્ધો
વ્યક્તે વાવ્યક્તરૂપે પ્રણવવપુરયં બ્રહ્મરૂપઃ સ્વમાત્રઃ ।
યો વ્યક્તો ભક્તહેતુર્નિરવધિરમલો નિર્ગુણો નિષ્ક્રિયોઽપિ
ભક્તાનાં મુક્તિહેતૌ વિદલયતિકૃતં માયિકસ્યાદ્વયઃ સઃ ॥ ૨॥

સર્પોરજ્જુર્હિ યદ્વન્ન ભુજગ ઇતિ સા કથ્યતે રજ્જુસર્પે
વિશ્વં બ્રહ્મૈવ તદ્વન્નચ જગદિતિ તત્ખલ્વિદં બ્રહ્મવાક્યે ।
સત્તાસામાન્યસરૂપાત્કથિતમપિ ચ યો દૃશ્યરૂપો ન તાદૃગ્
દૃશ્યં યદ્વિઘ્નકૃત્સ્યાત્તદપનતિ યો બોધતો વિઘ્નહાયમ્ ॥ ૩॥

સર્વં બ્રહ્મસ્વરૂપં પરમપરયુતં વિશ્વમાભાતિ યચ્ચ
ચૈતન્યસ્યાદ્વયત્વાત્ ગદિત ઇતિ ચ યો દૃશ્યરૂપોઽપ્યરૂપઃ ।
માયા તત્સર્વકાર્યં જડમિતિ કથિતં યં વિનાભાવમેતિ
સર્વત્રાવસ્થિતત્વાત્તદનુભવ ઇતિ સ્વાદનાદ્યોદ્વયઃ સઃ ॥ ૪॥

ભાત્યસ્ત્યાનન્દરૂપો સદસુખજડતારૂપદૃશ્યેસ્તિ યો વૈ
નિત્યો નિત્યાદિકાનાં ભવતિ કિલ તથા ચેતનશ્ચેતનાનામ્ ।
સર્વસ્યૈતસ્ય માયાકૃતસુખમિહ યત્પ્રાર્થ્યતે તદ્ગણેશો
યસ્તં સર્વાદિભૂતં ભજત જગતિ ભો! સારભૂતં વરેણ્યમ્ ॥ ૫॥

નિત્યં યન્નિર્વિકારં નિરતિશયસુખં બ્રહ્મ તન્મત્સ્વરૂપં
જ્ઞાત્વા વિશ્વાતિભૂતઃ સકલવિદલયન્ સ્વાર્ચિષાસ્વસ્થ આસે ।
માયા તત્કાર્યમેતત્ સ્પૃશતિ ન મયિ વા દૃશ્યતે નાવિરાસીન્
મયાયાઃ સર્વશક્તેઃ પર ઇતિ સતતં યઃ સ એવાદ્વયોહમ્ ॥ ૬॥

બ્રહ્માનન્દ કરોયમાત્મમતિદઃ શ્રીઢુણ્ઢિરાજસ્તવઃ
    વિઘ્નાઘૌઘઘનપ્રચણ્ડપવનઃ કામેભપઞ્ચાનનઃ ।
માયાવ્યાલકુલપ્રમત્તગરુડો મોહાટવીહવ્યવાડ્
    આનાન્ધ્યનિવારણૈકતરણિર્ભેદાબ્ધિકુમ્ભોદ્ભવઃ ॥ ૭॥

ઇતિ શ્રીમત્પરમહંસ પરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવતા
શ્રીધરસ્વામિના વિરચિતં શ્રીવિઘ્નવિનાશકસ્તોત્રં સમ્પૂર્ણમ્ ॥

રચનાસ્થકમ્ ચિક્કમંગલૂર, કૅાફિઉદ્યાનમ્   શકે ૧૮૬૫

Encoded and proofread by Sonali Upendra Dasare, Sumit

*Shri Vighnavinashaka Stotram*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*